# Mantrarnamuktavali

# મન્ત્રાર્ણમુક્તાવલી

## Document Information

Text title : Mantrarnamuktavali

File name : mantrArNamuktAvalI.itx

Category : shiva, mantra

Location : doc_shiva

Author : Krishnananda Saraswati

Proofread by : Rajesh Thyagarajan

Description/comments : Minor works of Shri Krishnananda Saraswati

Latest update : November 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 6, 2025

*sanskritdocuments.org*

# મન્ત્રાર્ણમુક્તાવલી

A garland of 24 verses studded as it were with pearls
of Beejakshara of Medha Dakshinamurti moola mantra
ॐ નમો ભગવતે દક્ષિણામૂર્તયે મહ્યં મેધાં પ્રજ્ઞાં પ્રયચ્છ સ્વાહા ।
The verses start with letters corresponding to the letters in the mantra in sequence.

ॐકારસન્મણિસમુદ્ગનિધેય નિત્યનીવીમયાય નિગમાન્તવિદાં મુનીનામ્ ।
આનન્દબોધઘનમઙ્ગલવિગ્રહાય ન્યગ્રોધમૂલનિલયાય નમઃશિવાય ॥ ૧॥

નક્ષત્રનાથપરિપાટલચારુગાત્રં મન્દસ્મિતાઞ્ચિતમુખં સ્વસુખાલસાક્ષમ્ ।
ચિન્મુદ્રિકાકલિત પુસ્તક ચિન્હપાણિં પશ્યામ્યપસ્મૃતિહરં હરમન્તરઙ્ગે ॥ ૨॥

મોક્ષાય મુક્તવિષયૈર્મુનિભિઃ પુરાણૈઃ શ્રીદક્ષિણાનનમુપાસ્યમપાસ્ય મન્દાઃ ।
મોહો મહાનયમહો મુષિતા હૃષીકૈર્યદ્દેવતાન્તરમુપાસિતુમારભન્તે ॥ ૩॥

ભવ્યો ભવસ્સરહિતાદિભવપ્રવાહે યસ્મિન્ પથિ ત્રયગમાગમખેદખિન્નાઃ ।
દિષ્ટ્યા મહાપથિક વિશ્રમદિવ્યવૃક્ષં દેવં વટદ્રુતટમઙ્ગલમાશ્રયન્તે ॥ ૪॥

ગમ્યં ગિરામનિદમાદિમસમ્ભવાનામન્તેષુ સન્તતસમાધિગતાન્તરઙ્ગૈઃ ।
પારે તમઃ પરચિતં પરયોગદૃષ્ટ્યા દિવ્યં વટદ્રુતટવાસિ મહઃ પ્રપદ્યે ॥ ૫॥

વસ્તામભાવુકભરેરજિનં મૃગાણામાસ્તામનાથવદધો વદભૂરુહસ્ય ।
આલમ્બતામપિ ચિતાભસિતાઙ્ગરાગમન્તસ્તમેવ શરણં મરણેઽપિ કુર્વે ॥ ૬॥

તે તે સમસ્ત જગતામભિલોભનીયા ભાવા ભવન્તુ હૃદિ મે ચિરમાવિરાવીઃ ।
તેજસ્તદેવ પરમાશ્રિતવૃક્ષમૂલમાલમ્બતે હૃદયમાદૃતયોધમુદ્રમ્ ॥ ૭॥

દત્તે સ્વયં સઘનદત્વમુદારભોગં વાગીશ્વરત્વમપિ વાઞ્છિતમોક્ષલક્ષ્મીમ્ ।
યસ્ય સ્મૃતૌ સકૃદપસ્મૃતિહારિ તેજો જાગર્તિ હૃત્તિમિરમણ્ડલચણ્ડભાનુઃ ॥ ૮॥

ક્ષિપ્રં ક્ષિણોતુ દુરિતં મમ દક્ષિણાસ્યં ક્ષીણાઘતાપસપચેલિમભાગધેયમ્ ।
જ્યોતિર્યદાન્તરતમં વટવૃક્ષમૂલે ક્ષેમાય દીક્ષિતમુદીક્ષિતમાત્તપુણ્યૈઃ ॥ ૯॥

ણાવિષ્ટવત્પ્રકૃતિકાર્યમિતિ બ્રુવાણા યન્નામવર્ણગુણગન્ધ્યપિ પાણિનીયાઃ ।
વિદ્યાવિશારદગણેષુ ગણેયરૂપાસ્તં દક્ષિણાનનગુરું ગુણયામિ ચિત્તે ॥ ૧૦॥

મૂર્છાકુલસ્ય મુહુરેવ ભવાધિદાવજ્વાલાવલીસમવલીઢસુધી કુલસ્ય ।
આર્તેરપાકરણમાશ્વસનીયમાસ્તે મૂર્તં મહઃ કિમપિ મૂલતટે વટદ્રોઃ ॥ ૧૧॥

તપ્તં તપઃ પરમતીતભવાન્તરેષુ દત્તં ચ વિત્તમભિગમ્ય મહત્તમેભ્યઃ ।
આરાધિતા ગુરુજના યદધો વટદ્રોરીક્ષે મહઃ કિમપિ મઙ્ગલદાયિ સાક્ષાત્ ॥ ૧૨॥

યે કેચિદાજનિજડા અપિ ચૈડમૂકા મૂકાશ્ચ કેવલમમી યમનુસ્મરન્તઃ ।
ચૂડાપદેષુ વિદુષામપિ વાવદૂકા દીવ્યન્તિ દિવ્યગુરુદેશિકમેનમીડે ॥ ૧૩॥

મન્દાક્ષમન્થરદૃશા શિવયાસિતાઙ્કં મન્દાકિનીપૃષતમઞ્જુજટાકલાપમ્ ।
ચિન્મુદ્રિકાક્ષગુણપુસ્તકકુણ્ડિકાઢ્યં શ્રીદક્ષિણાભિમુખમાદિગુરું ભજામઃ ॥ ૧૪॥

હ્યન્તે વસન્તિ મુનયો હિતદેશનાર્થા મૌનં વિભર્તિ મુહુરાદિમદેશિકોઽપિ ।
પશ્યન્ત્યથાપિ પરતત્વમમુન્તુ મન્યે સાક્ષાત્કૃતે નહિ ભવત્યુપદેશકાઙ્ક્ષા ॥ ૧૫।
મેધાવિનોઽપિ વસુ મે વસનાદિકં મે ક્ષેત્રાણિ મે ક્ષિતિરિયં સકલૈવ વેતિ ।
મે મે ગિરાજસમજોપમિતા વટદ્રુવાસ્તવ્યવસ્તુવિવશા મમ શોચનીયાઃ ॥ ૧૬॥

ધામ્ના કદાપિ હૃદયં સદયન્તુ તસ્મિન્ ધાતાસ્તુ વા શતમખો ધનદો ગુરુર્વા ।
આરાધ્યમાદિગુરુમાદરતે વટદ્રુમૂલાલયં યદિ ન મૂઢમતિર્નમસ્યન્ ॥ ૧૭॥

પ્રત્યક્ષમાકલયત પ્રતિભાં પુરસ્તાદસ્તાધિભિર્મુનિભિરન્તરુપાસનીયામ્ ।
છાયામયન્તિમિરમચ્છતનુપ્રકાશૈરાતન્વતીં વટતરોસ્તરુતાનુમેયામ્ ॥ ૧૮॥

જ્ઞાન્તાનિ કાર્યકરણાનિ વિવિચ્ય વિજ્ઞૈર્યજ્જ્ઞાનયોગનિરતૈર્યતિભિર્વિચેયમ્ ।
જ્યોતિઃ પરં કિમપિ તદ્વટવૃક્ષમૂલે વીક્ષધ્વમક્ષિજડિમક્ષિપમાત્તદેહમ્ ॥ ૧૯॥

પ્રત્યર્થનીયકુશલા મમ તે શુકાદ્યાશ્શાખાસુ યેઽપિ બહુપાદુરુપાદપસ્ય ।
ચાચંયમં કમપિ વાસિતબોધમુદ્રમાસાદ્ય સત્સદસિ દેશિકતાં ભજન્તે ॥ ૨૦॥

યત્સમ્ભવો યમવતામુચિતાન્વવાયે યચ્ચાપિ સદ્ગુરુપદાબ્જપરાગસેવા ।
યચ્ચાપ્યપસ્મૃતિહરસ્ય હરસ્ય વિદ્યા સર્વં તદન્યભવસઞ્ચિતભાગધેયમ્ ॥ ૨૧॥

છન્દો મમેતિ બહુપાદપિ સમ્ભવેયં યો દક્ષિણાનનગુરોરુપસંશ્રયેણ ।
મૌનાવલમ્બમતિલમ્બિજટાકલાપમાસેવિતં શુકમુખૈરુપયામિ સામ્યમ્ ॥ ૨૨॥

સ્વારાજ્યમસ્તુ દિવિ વા દિવિષન્નિષેવ્યં યામ્યા ભવન્તુ નિરયે મમ યાતના વા ।
ક્રવ્યાદભવ્યમપિ વા વિપિને મૃગત્વં સ્મેરાનનં યદિ મનઃ સ્મરતિ સ્મરારિમ્ ॥ ૨૩॥

હા હાન્ત પશ્યત સમેત વટદ્રુમૂલે મોહં નુદત્કિમપિ વસ્તુ મુનીન્દ્રગુહ્યમ્ ।
ચક્ષુઃ શુચં પ્રશમયચ્ચરણાભિભૂતાપસ્મારમસ્તિ બહુવિસ્મયનીયશીલમ્ ॥ ૨૪॥

ઓઙ્કારધ્વનિવાસનામુપનિષદ્યોસલ્લતાવલ્લરીં
હાર્દવ્યોમસમુદ્યદિન્દુકલિકામન્તર્નિશાહર્દશામ્ ।
ન્યગ્રોધદ્રુમમૂલનિત્યનિલયામેકામનાકાલિકી-
મચ્છાભાં પ્રતિભાં વિભાવયત તામન્તર્દૃગુદ્દીપિનીમ્ ॥ ૨૫॥

ઇત્યેષા વિહિતા વિમોક્ષપદવીદીક્ષાગુરોર્દક્ષિણા-
મૂર્તેરાર્તજનાવનવ્યસનિનો મન્ત્રાર્ણમુક્તાવલી ।
આકલ્પં સુધિયામનલ્પસુષુમા કણ્ઠેષુ કલ્પ્યા સદા
વિદ્યામુક્તિવધૂસ્વયંવરવિધૌ માઙ્ગલ્યમાલાયિતા ॥ ૨૬॥

શ્રીરામભદ્રયોગીન્દ્રચરણામ્બુજરેણુના ।
કૃષ્ણાનન્દેન મન્ત્રાર્ણમુક્તાવલિરિયં કૃતા ॥ ૨૭॥

ઇતિ મન્ત્રાર્ણમુક્તાવલી સમાપ્તા ॥

Proofread by Rajesh Thyagarajan

*Mantrarnamuktavali*
pdf was typeset on November 6, 2025

Please send corrections to *sanskrit@cheerful.com*